वर्षम् - ०१ अङ्कः - ०१
जनवरी-दिसम्बर, २०१९

शोधज्योतिः
ISSN-2350-0700

# हिरण्यगर्भजगत्कारणत्ववादनिरासः

**गणेश हेगडे***

विदितमेवैतत् समेषामास्तिकविदुषां यत् धर्ममूलमिदं जगत्, वेदोऽखिलो धर्ममूलमिति च। समग्रोऽपि वेदराशिः धर्ममेव प्रतिपादयति। स च धर्मः प्रवृत्तिनिवृत्त्युभयात्मकः। पूर्वकाण्डे प्रवृत्तिधर्मः प्रतिपादितः। उत्तरकाण्डे पुनः निवृत्तिधर्मः प्रतिपादितः। अत एव पूर्वोत्तरभागेन विभक्तः वेदः पूर्वोत्तरमीमांसारूपशास्त्रद्वयेन विचारितः। उत्तरमीमांसा एव वेदान्तशब्देनाभिधीयते। वेदान्तो नाम प्राधान्येन उपनिषद एव। उपनिषदर्थं न्यायेन निर्णेतुं भगवान् बादरायणः वेदान्तविचारात्मिकां शारीरकमीमांसाम् अरीरचत्। तच्च शास्त्रं भगवत्पादाः प्रसन्नगम्भीरेण भाष्येण अभूषयन्। प्रसन्नगम्भीरमिदं भाष्यं बहुभिर्बहुधा व्याख्यातं, तदुपरि टीकोपटीकाश्च समागताः। तस्यास्य भगवत्पादीयस्य शारीरकभाष्यस्य प्राधान्येन प्रवृत्तं व्याख्यानं प्रस्थानद्वयम्। तत्र श्रीपद्मपादाचार्यकृतपञ्चपादिकाप्रस्थानमेकम्। अन्यत्तु आचार्यवाचस्पतिमिश्रकृतभामतीप्रस्थानम्। भामत्याः व्याख्यां कल्पतरुं परिमलनामकेन व्याख्यारत्नेन परिभूषितवन्तोऽपि श्रीमदप्पय्यदीक्षिताः तेन तृप्तिमनासाद्य भगवत्पादीयसिद्धान्तं विस्तरेण प्रतिपादयितुं सूत्रभाष्यविमर्शात्मकव्याख्यानेन बोधयितुं “न्यायरक्षामण्याख्यं” ग्रन्थरत्नं व्यरचयन्। अत्र जन्माद्यधिकरणे हिरण्यगर्भाख्यजीवस्य जगत्कारणत्वं न संभवतीति उपपादितम्। अयमेव विचारः मयाऽत्र प्रस्तूयते।

जिज्ञासाधिकरणे तावत् **“नित्यानित्यवस्तुविवेकादिमुमुक्षुत्वात्तत्साधनचतुष्टयसंपत्त्यनन्तरं तत्संपत्तेरेव हेतोः मोक्षसाधनप्रत्यगभिन्ननिर्विशेषब्रह्मज्ञानाय वेदान्तविचारः कर्तव्यः**” इति निर्णीतम्। **“लक्षणप्रमाणाभ्यां वस्तुसिद्धिः**” इत्युक्तत्वात् ब्रह्मणो लक्षणबुबोधयिषया द्वितीयं जन्माद्यधिकरणं संप्रवर्तते। तत्र “**जन्माद्यस्य यतः**”[१] इति ब्रह्मणो लक्षणमुक्तम्। अत्र पूर्वसूत्रात् ब्रह्मपदमनुवर्तते। तच्छब्दश्च अध्याह्रियते। ततश्च अस्य जगतः जन्मादि जन्मस्थितिभङ्गं यतः यस्मात् कारणात् तत् ब्रह्म इत्यर्थः सम्पन्नः। तथा च जन्मस्थितिलयकारणत्वं ब्रह्मणः लक्षणमित्युक्तं भवति। सर्वज्ञं सर्वशक्तं चेतनं ब्रह्मैव

---

* शोधच्छात्रः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

[१] ब्र.सू. १ – १ – २

जगत्कारणमिति दर्शयितुं भाष्ये **"अस्य जगतो नामरूपाभ्यां व्याकृतस्य, अनेककर्तृभोक्तृसंयुक्तस्य, प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य, मनसाप्यचिन्त्यरचनारूपस्य"** इति चत्वारि विशेषणानि प्रयुक्तानि। पुनः **"न च यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वा, अन्यतः प्रधानादचेतनात् अणुभ्योऽभावात्संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम्"**[२] इति सयुक्तिकं ब्रह्मभिन्नानां जगत्कारणत्वं निराकृतम्। ब्रह्मभिन्नानां जगत्कारणत्ववादाः श्वेताश्वतरोपनिषदि निराकृताः। तत्र हि **"ब्रह्मवादिनो वदन्ति। किं कारणं ब्रह्म कुतः स्म जाताः"**[३] इत्युपक्रम्य –

**"कालः स्वभावो नियतिर्यदृच्छा**<br>**भूतानि योनिः पुरुष इति चिन्त्यम् ।**<br>**संयोग एषां न त्वात्मभावा-**<br>**दात्माऽप्यनीशः सुखदुःखहेतोः ॥"**[४]

इति कालादीनां जगत्कारणत्वं प्रत्याख्यातम्। भाष्यकाराः श्वेताश्वतरमन्त्रार्थं मनसि पर्यालोच्यैव **"अस्य जगतो नामरूपाभ्यां व्याकृतस्ये"**त्यादिवाक्यं व्यरचयन् इति ब्रह्मविद्याभरणकाराः अभिप्रयन्ति। भामतीकाराः **"अस्य जगतो नामरूपाभ्यां व्याकृतस्ये"**त्यादिभाष्यमवतारयन्तः **"प्रधान-काल-ग्रह-लोकपाल-क्रिया-यदृच्छा-स्वभाव-अभावेषु उपप्लवमानेषु सत्सु सर्वज्ञं सर्वशक्तिस्वभावं ब्रह्म जगत्कारणमिति कुतः सम्भावना"**[५] इत्यलिखन्। श्रुतौ विद्यमानस्य पुरुषशब्दस्य स्थाने भामत्यां ग्रहलोकपालशब्दौ प्रयुक्तौ। इदं हिरण्यगर्भस्य उपलक्षणमिति दीक्षितैर्वर्णितम्। एवं पञ्चपादिकायाम् **"अस्य जगतो नामरूपाभ्यां व्याकृतस्येत्याद्यभिहितविशेषणचतुष्टयस्य, यथोक्तविशेषणमीश्वरं मुक्त्वेति= सर्वज्ञं सर्वशक्तिं विहाय नान्यतः = परपरिकल्पितात्प्रधानादेरचेतनात्, चेतनादपि परिच्छिन्नज्ञान-क्रियाशक्तेः संसारिणो हिरण्यगर्भादुत्पत्त्यादि सम्भावयितुमपि शक्यम्"**[६] इत्युक्तम्। तदवतारयन्तः विवरणकाराः **"योगाः शैवाश्च हिरण्यगर्भं पशुपतिं चागमसामर्थ्याज्जगत्कारणं कल्पयन्ति। तान् पक्षान् व्यावर्तयति - नान्यतः परकल्पितात्"**[७] इत्यलिखन्। एवं चित्सुखाचार्याः भाष्यभावप्रकाशिकायां **"योगिनश्च हिरण्यगर्भं संसारिणमागमसामर्थ्याद् जगत्कारणं कल्पयन्ती"**ति हिरण्यगर्भजगत्कारणवादं

---

[२] ब्र.सू.शां भा. १ – १ – २ पृ – ६

[३] श्वे.उ. १ – १

[४] श्वे.उ. १ – २

[५] भा.१ – १ – २. पृ. ८५

[६] पं.पा.१. पृ. ५३६

[७] पं.पा.वि. १. पृ. ५३६

अनूद्य **"आगमस्तु हिरण्यगर्भादीनां वेदविरोधादप्रमाणमिति"**[८] हिरण्यगर्भजगत्कारणवादं निराकुर्वन्ति। तस्मात् हिरण्यगर्भाख्यजीवस्य जगत्कारणत्वमवश्यं निरसनीयम्। किं तु एतदर्थं सूत्रकारेण पृथगधिकरणं नारब्धम्। सूत्रकारस्तु जन्मादिसूत्रघटकेन अस्य इति पदेनैव जीवं व्यावर्तयति। तथाहि जगतः – कार्यस्य इति वा निर्देशसंभवे सूत्रकारः तदुभयं त्यक्त्वा "**अस्य**" इति निर्दिशति। इदं शब्दस्य सन्निकृष्टप्रत्यक्षविषयवाचकत्वात् सन्निकृष्टप्रपञ्चस्य वैचित्र्यं अनेन ज्ञाप्यते। मूलश्रुतावपि **"यतो वा"** इत्यत्र भूतपदेनैव कार्यवर्गस्य अभिधाने सति पुनः "इमानि" इति पदं कार्यवर्गस्य वैचित्र्यज्ञापनार्थम्। अनेन एतादृशवैचित्र्योपेतप्रपञ्चस्य कारणत्वं संसारिणो = जीवस्य न संभवतीति, जीवस्य व्यावृत्तिस्सिद्ध्यति। अत एव सूत्रकारः अग्रे प्रधानादिजगत्कारणवादान् निरस्यति। मूलश्रुतौ यद्यपि "इमानि" इति बहुवचनं वर्तते सूत्रकारेण "अस्य" इति एकवचनं प्रयुक्तम्। तस्येदमेव प्रयोजनम् – यथा लोके एकः कर्ता एकं कार्यम् अनायासेन करोति, तथैव परमेश्वर अनेकमपि कार्यजातम् एककार्यवदनायासेन करोति। तच्च जीवानां न संभवतीति ज्ञापनार्थम्। एवं च अस्य इति पदेनैव हिरण्यगर्भाख्यजीवस्य जगत्कारणत्वं निराकृतं भवतीति पृथगधिकरणं नारब्धम्। तस्मात् हिरण्यगर्भाख्यजीवस्य जगत्कारणत्वम् अत्रैव निरसनीयमिति कृत्वा दीक्षितैः न्यायरक्षामणौ अयं विचारः प्रदर्शितः।

तत्र **"यतो वा"** इत्यादिश्रुत्युक्तं ब्रह्मणो जगत्कारणत्वं युक्तमयुक्तं वेति संशय्य न लक्षयतीति पूर्वपक्षः प्रापितः। पूर्वपक्षहेतवः -

१. क्वचित् श्रुतौ हिरण्यगर्भस्यैव जगत्कारणत्वं श्रूयते। यथा प्रश्नोपनिषदि अन्त्यप्रश्ने षोडशकलं भारद्वाज पुरुषं वेत्थ इति पृष्टः सन् भारद्वाजः पिप्पलादमहर्षिमागत्य पप्रच्छ **"तं वा पृच्छामि क्वासौ पुरुषः"**[९] इति। तदा पिप्पलादः **"इहैवान्तश्शरीरे सोम्य स पुरुषः यस्मिन्नेताः षोडशकलाः प्रभवन्ति"**[१०] इत्यवधारणपूर्वकं तस्य पुरुषस्य शरीरान्तःस्थत्वमाह। इदं शरीरान्तःस्थत्वं जीवलिङ्गम्। ब्रह्मणि च शरीरान्तःस्थत्वं संभवेत् , किं तु **"अनुपपत्तेस्तु न शारीरः"**[११] इति सूत्रभाष्योक्तरीत्या शरीरे भवति न तु शरीरे एव भवति। एवमत्रापि **"इहैवान्तःशरीरे"** इति **"एव"** शब्दः वर्तते। अतोऽवगम्यते अयं पुरुषः जीव इति।

---

[८] भा.भा.प्र.१ – १ – २ .पृ.६३

[९] प्र.उ. ६ – १

[१०] प्र.उ. ६ – २

[११] ब्र.सू. १ – २ – ३

२. अपि च "**स ईक्षाञ्चक्रे कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामी**"ति[१२] श्रूयते। अत्र प्राणोत्क्रान्तिप्रतिष्ठानप्रयुक्तोत्क्रान्तिप्रतिष्ठानवत्वं श्रूयते। इदमपि जीवलिङ्गम्। यतः परब्रह्मणः अस्मिन् शरीरे प्राणोत्क्रान्तिप्रतिष्ठानप्रयुक्तोत्क्रान्तिप्रतिष्ठे न स्तः।

३. एवं जीवत्वेन निश्चितस्य अस्य पुरुषस्य प्राणादिनामान्तषोडषकलास्रष्टृत्वं श्रूयते – "**स ईक्षाञ्चक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति, स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोकाः लोकेषु च नाम चे**"ति[१३]। यद्यपि इदं च स्रष्टृत्वमस्मदादेर्जीवस्य न संभवति। तथापि प्रथमजस्य हिरण्यगर्भस्य संभवति। तस्य अप्रतिहतज्ञानक्रियाशक्तिमत्वात्। तथा च स्मर्यते –

**ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः।**
**ऐश्वर्यं चैव धर्मस्य सहसिद्धं चतुष्टयम् ॥**[१४] इति।

शङ्का – हिरण्यगर्भस्य स्रष्टृत्वं नोपपद्यते। यतो हि – सृष्ट्यादौ जगत्स्रष्ट्रा पञ्चभूतसृष्टिः कर्तव्या। कर्तृत्वं च ज्ञानक्रियाकृतिमत्वम्। तत्र ज्ञानस्य नित्यत्वेन कथञ्चित् अन्यनिरपेक्षतया उपपन्नत्वेऽपि, चिकीर्षा कृतिश्च देहाश्रितान्तःकरणपरिणामौ। देहेन्द्रियान्तःकरणादिकं भौतिकम्। अतः भूतसृष्ट्यनन्तरभाविदेहाश्रितान्तःकरणपरिणामरूपयोः चिकीर्षाकृत्योः भूतसृष्टेः प्रागसत्त्वात् तत्प्रयुक्तं भूतसृष्टिनिर्वाहकत्वं हिरण्यगर्भस्य न संभवति।

समाधानम् – तर्हि परब्रह्मणोऽपि भूतस्रष्टृत्वं न स्यात्। यतो हि परब्रह्मणोऽपि शरीरेन्द्रियान्तःकरणत्वाभावः श्रूयते। "**अकायो अप्राणो ह्यमनाः**" इत्यन्तःकरणस्याभावः, "**अचक्षुःश्रोत्रं तदपाणिपादम्**" इति इन्द्रियाभावः श्रूयते। अतः देहाद्यन्तःकरणाभावात् ब्रह्मणोऽपि कर्तृत्वं न स्यात्। यदि देहेन्द्रियादीनामभावेऽपि परब्रह्मण ईक्षणमात्रेण सृष्टिरुच्यते तर्हि हिरण्यगर्भस्यापि तथैव उच्यताम्। अत्रापि "**स ईक्षाञ्चक्रे**" इति श्रुतम्। यदि ब्रह्मणः स्वतः देहेन्द्रियादीनामभावेऽपि चिकीर्षाकृत्योः सोपाधिभूतमायापरिणामरूपत्वात् मायामाश्रित्योपपादयितुं शक्यते। तर्हि हिरण्यगर्भेऽपि इदमुपपादयितुं शक्यते। तस्य सर्गादौ सूक्ष्मावस्थमन्तःकरणं विद्यते। यतः सत्कार्यवादानुसारं सर्वमपि कार्यम् उत्पत्तेः प्राक् एव सत्। अतः सूक्ष्मावस्थान्तःकरणवत्वेन हिरण्यगर्भस्य स्रष्टृत्वं संभवति। अयमेव

[१२] प्र.उ. ६ – ४

[१३] प्र. उ. ६ – २ – ४

[१४] बृ.शां.भा.अ – १, ब्रा – ४, मं – २, पृ.५

पक्षः युक्ततरः। यतो हि "**कामः सङ्कल्प**"[१५] इत्यादिश्रुतिः कामादीनामन्तःकरणधर्मत्वमाह। एवं "**विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च**"[१६] इत्यादिश्रुतिः कृतेरपि अन्तःकरणधर्मत्वमाह। उक्तरीत्या हिरण्यगर्भस्य अन्तःकरणवत्वेन एतदुपपादयितुं शक्यते। परब्रह्मणः अन्तःकरणादीनां सुतरामभावात् तस्य कारणत्वं न संभवति। ततश्च प्रश्नोपनिषद्वाक्येन हिरण्यगर्भस्य जगत्कर्तृत्वं ज्ञायते।

४. बृहदारण्यकोपनिषदि "**आत्मैवेदमग्र आसीत् पुरुषविधः**"[१७] इति हिरण्यगर्भं प्रस्तुत्य "**ततो मनुष्या अजायन्त**"[१८] इत्यादिना "**यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत**"[१९] इत्यन्तेन तस्य मनुष्यादिस्रष्टृत्वमुक्त्वा तदनन्तरम् अग्न्यादिस्रष्टृत्वमुक्तम्। अतः अत्रापि हिरण्यगर्भस्यैव स्रष्टृत्वं वाच्यम्। अत्र पुरुषविधः = पुरुषप्रकारः शिरःपाण्यादिमान् इत्यर्थः। अतः अयमात्मा जीवः, ब्रह्मणः पुरुषाकारत्वाभावात्। यद्यपि अस्मदादिजीवाः तदा न भवन्ति। तथापि हिरण्यगर्भाख्यजीवः तदानीमस्ति। **आत्मैवेदमग्र आसीदित्यत्र** आत्मशब्दः परब्रह्मपरः भवितुं नार्हति। "**स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुषः**[२०] इति संसारिधर्माणामेव श्रवणात्। सः प्रजापतिः यस्मात् प्रथमः सन् प्रजापतित्वप्रेप्सूनां प्रजापतित्वप्राप्तिप्रतिबन्धकपापानि अदहत्, तस्मात् पुरुषनामाभवत् इति श्रुत्यर्थः। पापदाहश्च पापासत्त्वेव संभवति। एवम् "**सोऽबिभेत्**"[२१] "**स वै नैव रेमे**"[२२] इत्यादिना श्रुतं भयारत्यादीनि च परब्रह्मणि अनुपपद्यमानानि कश्चन जीवस्तत्रोक्तः इति ज्ञापयन्ति। तस्यैव जीवस्य तत्र "**यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत**"[२३] इत्यादिना मनुष्याग्निस्रष्टृत्वं श्रूयते। इदं च प्रागुक्तरीत्या हिरण्यगर्भस्य संभवति।

शङ्का – "**आत्मैवेदमग्र आसीत् पुरुषविधः**" इत्यत्र हिरण्यगर्भस्य सर्वप्राणिस्रष्टृत्वं भवतु, तावता ब्रह्मलक्षणस्य हिरण्यगर्भे अतिव्याप्तिर्नास्ति। यतो हि अत्र वियदादिस्रष्टृत्वं न श्रुतम्। लक्षणवाक्ये तु वियदादिनिखिलस्रष्टृत्वं विवक्षितम्। लक्षणवाक्ये श्रूयमाणभूतशब्दः पञ्चभूतपरः। अतः वियदादिभूतस्रष्टृत्वं हिरण्यगर्भस्य न संभवति।

---

[१५] बृ.उ. १ – ५ – ३
[१६] तै.उ. २ – ५
[१७] बृ.उ. १ – ४ – १
[१८] बृ. उ. १ – ४ – ३
[१९] बृ. उ. १ – ४ – ४ पृ. ६१
[२०] बृ. उ १ – ४ – १ पृ. ५५
[२१] बृ. उ. १ - ४ – २ पृ. ५७
[२२] बृ. उ. १ - ४ – ३ पृ. ६०
[२३] बृ. उ. १ – ४ – ४ पृ. ६१

समाधानम् – अत्र देवमनुष्यादिसकलप्राणिजातस्रष्टृत्वमेव लक्षणम्। न तु वियदादिभूतस्रष्टृत्वम्। यतो हि "**यतो वा**" इत्यादिलक्षणवाक्ये "**येन जातानि जीवन्ति**" इति श्रुतम्। जीवनञ्च प्राणधारणम्, "**जीवप्राणधारणे**" इति स्मृतत्वात्। तच्च व्यष्टिसमष्ट्योः तादात्म्यात् समष्टिप्राणाभिमानिनः हिरण्यगर्भस्य संभवति। न तु परब्रह्मणः। अतः हिरण्यगर्भस्यैव जगदुत्पत्तिकारणत्वं वाच्यम्।

शङ्का :– लक्षणवाक्ये "**यत्प्रयन्त्यभिसंविशन्ती**" ति भूतलयाधारत्वं श्रूयते। तच्च हिरण्यगर्भस्य न संभवति।

समाधानम् :– पुराणेषु हिरण्यगर्भस्य लयाधारत्वमपि स्मर्यते। तद्यथा –

**"एकार्णवे च त्रैलोक्ये ब्रह्मा नारायणात्मकः।**
**भोगिशय्यां गतः शेते त्रैलोक्यग्रासबृंहितः ॥**
**जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भवः ॥**[२४] **इति।**

अत्र त्रैलोक्यग्रासबृंहितः इत्यनेन भूतलयाधारत्वं हिरण्यगर्भस्य उक्तम्।

शङ्का :– "**यतो वा**" इत्यादिलक्षणवाक्ये विवक्षितं न जगतः सृष्टिकर्तृत्वरूपं निमित्तकारणत्वम्, किं तु उपादानत्वम्। तथा हि – "यतो वा" इत्यत्र पञ्चमी श्रूयते। अत्र "**जनिकर्तुः प्रकृतिः**"[२५] इति जायमानानां हेतोः अपादानसंज्ञां विधाय ततः "**पञ्चम्यपादानम्**" इति पञ्चमी विहिता। तस्मादत्र उपादानकारणत्वमेव लक्षणं विवक्षितम् , तच्च हिरण्यगर्भस्य न संभवति। परब्रह्मण एव संभवति।

समाधानम् :– भूतोपादानत्वमपि तत्तज्जीवाभेदेन अध्यस्तत्वात् जीव एव संभवति। तद्यथा – प्रागुक्तरीत्या भूतशब्दः प्राणिपरः। प्राणिनाम् अर्थात् जीवानां नित्यत्वात् उत्पत्तिर्नास्ति। "**न जायते**"[२६] इत्यादिश्रुतेः। तस्मात् जीवोपाधिभूतानां देहेन्द्रियान्तःकरणनां तत्तज्जीवाभेदेनाध्यस्तानां सृष्टिरेवात्र वक्तव्या। उपादानत्वं नाम देहेन्द्रियान्तःकरणादीन् प्रत्युपादानत्वमेव। देहेन्द्रियान्तःकरणानां तु उपादानं जीव एव। "अहं स्थूलः, अहं गौरः, अहं काणः, अहं कामये" इत्येवं देहादीनां जीवेनैव तादात्म्यप्रतीतेः। सिद्धान्तेऽपि उपादानत्वं नाम अध्यासाधिष्ठानत्वमेव। एतादृशोपादानत्वं जीव एव संभवति। एवं हिरण्यगर्भाख्यजीवे लक्षणमिमतिव्याप्तत्वात् ब्रह्मणः जगत्कारणत्वरूपं लक्षणम् अयुक्तमिति पूर्वः पक्षः।

---

[२४] वि.पु.प्रथमांशः, अध्याय – ३, श्लो. २४ पृ. १०

[२५] अष्टाध्यायी १ – ४ – ३०

[२६] क.उ. १ – २ – १८

सिद्धान्तः – हिरण्यगर्भे अस्य लक्षणस्य अतिव्याप्त्याद्यभावात् जगत्कारणत्वं ब्रह्मणः लक्षणं भवतीति सिद्धान्तः। सिद्धान्तहेतवः –

१. अत्र प्रागुक्तातिव्याप्तिदोषवारणाय "**आद्यस्य जन्म यतः**" इति सूत्रयोजना कर्तव्या। आद्यः हिरण्यगर्भः। तदानीं हिरण्यगर्भस्यापि सृज्यमानत्वात्, तस्य च स्वस्रष्टृत्वासम्भवात्, ब्रह्मैव हिरण्यगर्भसहितस्य सर्वस्यापि जगतः कारणमिति सूत्रार्थः सिद्ध्यति।

अयं सिद्धान्तः श्लोकाभ्यां संगृहीतः –

**"भूतानि भौतिकञ्चाण्डं निर्मायेदमनन्तरम्।**
**हिरण्यगर्भं तन्मध्ये निर्ममे परमेश्वरः ॥**
**इत्यर्थे सकलश्रुत्याद्यैककण्ठ्यस्य दर्शनात्।**
**स षोडशकलास्रष्टा पुरुषः पर एव नः ॥"** [२७] इति।

अयमर्थः – श्रुतिस्मृतिपुराणेतिहासादिषु परमेश्वर एव जगत्कारणमिति भूयो निरूपणं दृश्यते। सः परमेश्वर आदौ अपञ्चीकृतानि पञ्चभूतानि सृजति, ततः तेषां पञ्चीकरणं विधाय ब्रह्माण्डं सृजति, ब्रह्माण्डमध्ये हिरण्यगर्भमपि सृजतीत्यस्मिन्नर्थे सन्ति भूयांसि वाक्यानि। तथा हि श्रुतयः - "**यो ब्रह्माणं विदधाति पूर्वम्**"[२८] "**हिरण्यगर्भं जनयामास पूर्वम्**", "**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्**"[२९] "**हिरण्यगर्भं पश्यत जायमानम्**" इत्याद्याः।

**"ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम्।**
**महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥"**[३०]

इति परमेश्वरेण क्रियमाणां सृष्टिं प्रकृत्य –

**"योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।**
**सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥"**[३१] इति स्मर्यते।

एवं पुराणेष्वपि कूर्मपुराणे वायुपुराणे च –

---

[२७] न्या.र. १ – १ – २ पृ. १२
[२८] श्वे.उ. ६ – १८
[२९] ऋ.सं. १० – १२१ – १
[३०] म.स्मृ. प्रथमोध्यायः, श्लो. ६ पृ. २८
[३१] म.स्मृ. प्रथमोध्यायः, श्लो. ७ पृ. ३० / भाष्ये आनन्दगिरिश्रीचरणैश्च अतीन्द्रियो ग्राह्यः इति पाठः स्वीकृतः।

**स वै शरीरी प्रथमः स वै पुरुष उच्यते।**
**आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥**[३२] इति।

एवम् –

**असृजेत् सलिलं पूर्वं स तु नारायणः प्रभुः।**
**ततः तु भगवान्स्तोये ब्रह्माण्डमसृजेत्स्वयम् ॥**[३३] इति।

एवं श्रुतिस्मृतिपुराणेतिहासेषु परमेश्वरः सहिरण्यगर्भप्रपञ्चं सृजतीति निरूपितत्वात्, प्रश्नोपनिषद्यपि षोडशकलास्रष्टृत्वेन श्रुतः पुरुषः ब्रह्मैव। तत्रापि षोडशकलानां मध्ये पञ्चभूतानि अनुप्रविष्टानि, यानि भौतिकशरीरोपेतहिरण्यगर्भेण स्रष्टुमशक्यानि।

२. किं च अत्र षोडशकलापुरुषोपदेशानन्तरं पिप्पलादवचनं श्रुतम् – **"एतावदेवाहमेतत् परं ब्रह्म वेद नातः परमस्ति"** इति। अत्र एतदिति प्रकृतषोडशकलं पुरुषं परामृश्य तस्य ब्रह्मशब्देन सामानाधिकरण्यात् प्राग्निरूपितः षोडशकलः पुरुषः ब्रह्मैवेति ज्ञायते।

पूर्वपक्षोक्तहेतूनां निराकरणम् – १. पूर्वपक्षिणा यदुक्तं प्राणोत्क्रान्तिप्रतिष्ठाभ्यां तस्य जीवत्वमवगम्यत इति, तत्रोच्यते–

**प्राणोत्क्रान्तिप्रतिष्ठाभ्यां स्वस्य तद्वत्त्ववीक्षणम्।**
**जीवस्य तद्वतस्ताभ्यां स्वात्मत्वेनावलोकनात् ॥**[३४] इति।

अयमर्थः – अस्मिन्नपि शरीरे जीवरूपेण स्थितं ब्रह्मैव, तच्च ब्रह्म अविद्याद्यावरणराहित्यात् स्वस्मात् जीवस्याभेदं पश्यति, अतः जीवगतोत्क्रान्तिप्रतिष्ठे स्वात्मीयतया अवलोकयति। एवं जीवगतधर्मस्य स्वात्मनि व्यपदेशः अन्यत्रापि दृष्टः। तत्प्रदर्शयन्ति न्यायरक्षामणिकाराः –

**"तेजोऽबन्नप्रवेशो हि जीवकर्तृक एव सन्।**
**जीवस्य स्वात्मतादृष्ट्या तेन स्वीयतयेरितः ॥"** [३५] इति।

यथा छान्दोग्ये **"हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"**ति[३६] श्रूयते। अत्र अनुप्रवेशस्य जीवकतृकत्वेऽपि ब्रह्म तमनुप्रवेशं स्वात्मीयतया

---

[३२] कूर्ममहापुराणम् – पूर्वभागे चतुर्थोऽध्यायः श्लो. – ३८ पृ. २१

[३३] महाभारतम् – २ – २१ – ४६

[३४] न्या.र. १ – १ – २ पृ. १२

[३५] न्या.र. १ – १ – २ पृ. १२

अवलोकयतीत्येव वक्तव्यम्। अन्यथा अनुप्रवेशस्य नामरूपव्याकरणस्य च समानकर्तृत्वव्यपदेशो न स्यात्। एवं प्रकृतेऽपि जीवगतमपि उत्क्रमणं ब्रह्मणा स्वात्मीयतया वीक्ष्यत इति न विरोधः।

२. बृहदारण्यके तु हिरण्यगर्भस्य देवमनुष्यादिस्रष्टृत्वं यच्छ्रूयते तद्धिरण्यगर्भस्यैव। तावता ब्रह्मलक्षणस्य हिरण्यगर्भे अतिव्याप्तिर्नास्ति। यतो हि लक्षणे सर्वकार्यस्रष्टृत्वं विवक्षितम्। तच्च हिरण्यगर्भस्य न सम्भवति, स्वयमेव उत्पद्यमानत्वात्। स्वं प्रति स्वस्य स्रष्टृत्वासम्भवात्। एवम् अतीतानागतकल्पेषु देवमनुष्यादीनां स्रष्टृत्वम् अस्य हिरण्यगर्भस्य न सम्भवति, तदानीम् अस्य अभावात्।

हिरण्यगर्भेण सर्वप्राणिसृष्टिः क्रियते चेदपि तावता ब्रह्मण्यपि कर्तृत्वमायात्येव, यथा कुलालादिसृष्टेषु घटादिषु ईश्वरस्य कारणत्वं न हीयते तद्वत्। अथवा हिरण्यगर्भसृष्टिद्वारा सर्वप्राणिस्रष्टृत्वं सम्भवति। यतो हि हिरण्यगर्भः द्वारकारणम्। द्वारकारणस्य प्रधानकारणविघटकत्वं नास्ति। अतः भूतानां निमित्तकारणं ब्रह्मैव, एवम् उपादानमपि।

३. यदुक्तं पूर्वपक्षिणा जीव एव उपादानकारणम् अध्यासाधिष्ठानत्वादिति, तन्नोपपद्यते। यतः पूर्वपक्षिणा एवमभिमतम्, अधिष्ठानतादात्म्यमेव अध्यस्ते प्रतीयते इति। किं तु नायं नियमः, अधिष्ठानतावच्छेदकोऽपि अध्यस्ते भासते। यथा इदं रजतमित्यत्र इदमवच्छिन्नं ब्रह्मचैतन्यम् अधिष्ठानम्, इदमंशः अधिष्ठानतावच्छेदकः, तत्तादात्म्यं रजते भासते इदं रजतमिति। एवमिहापि जीवावच्छिन्नं ब्रह्मचैतन्यं देहेन्द्रियाद्यधिष्ठानम्। तदानीम् अधिष्ठानतावच्छेदकीभूतजीवतादात्म्यं देहेन्द्रियादिषु भासते। अतः अहं स्थूलः, अहं कर्ता, अहं काणः इत्येवं प्रतीतिः। एवमधिष्ठानतावच्छेदकतया एव उपपत्तौ जीवस्य पृथगुपादानत्वं न वक्तव्यम्। जीवस्य अवच्छेदकत्वे **"य आत्मनि तिष्ठन्"**[३७] इति श्रुतिरेव प्रमाणम्। आत्मशब्दः जीवे रूढः। अतः आत्मनि जीवे ब्रह्मणः स्थितिर्नाम जीवावच्छिन्नत्वेन रूपेण अवस्थानम्। एवं च जीवावच्छिन्नं ब्रह्मचैतन्यमधिष्ठानमित्युच्यते। अस्मिन्नेवार्थे श्रुत्यन्तरमपि भवति –

**"यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।**
**तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति"॥**[३८] इति।

अत्र दृष्टान्तवाक्यार्थः स्पष्टः। दार्ष्टान्तिकेऽपि सरूपाः इति पदमनुवर्तते। तेन अक्षरं = ब्रह्म, अक्षरात्=ब्रह्मणः विविधाः सरूपाः भावाः प्रजायन्ते इत्यर्थः। अत्र भावशब्दस्य जीव इत्यर्थः। किं तु

---

[३६] छा.उ. ६ – ३ – २
[३७] बृ. उ ३ – ७ – ९
[३८] मुं.उ. २ – १ – १

जीवानां नित्यत्वेन उत्पत्तिर्नास्ति। अतः देहेन्द्रियाणामुत्पत्तिरेव वक्तव्या। तस्मात् अनया श्रुत्या ब्रह्मणः देहेन्द्रियाणामेव उत्पत्तिरुच्यते। एतदुक्तं भवति – **"यथा शुक्तितादात्म्येन अध्यस्यमाने रजते शुक्त्यवच्छिन्नं ब्रह्मैव उपादानम्, एवं जीवतादात्म्येन अध्यस्यमानेषु जीवावच्छिन्नं ब्रह्मचैतन्यमेवोपादानम्"** इति। तस्मात् नास्ति पूर्वोक्तदोषः।

एवमतिव्याप्त्यभावात्, लक्षणस्य सप्रयोजनत्वात्, ब्रह्मणः जगत्कारणत्वरूपं लक्षणं युक्तमिति सिद्धान्तः। तथा च हिरण्यगर्भाख्यजीवः जगकर्ता भवितुं नार्हति इति सिद्धम्।

## परामृष्टाः ग्रन्थाः

१. ब्रह्मसूत्रभाष्यम्, ग्रन्थकारः - श्रीमच्छङ्करभगवत्पादाचार्यः, श्रीजगद्गुरु शङ्कराचार्य-महासंस्थानम्, श्रृङ्गेरि, २०११

२. न्यायरक्षामणिः, ग्रन्थकारः – श्रीमदप्पय्यदीक्षितः, श्रीमदप्पय्यदीक्षितेन्द्र-ग्रन्थावलीप्रकाशन-समितिः, सिकन्दराबाद्, १९७१